(दुष्ट आचारो यस्य ।) निन्दिताचारवति, त्रि ॥ (यथा, देवीभागवते । १ । ११ । १६ ।
"महापातकयुक्तस्त्वं दुराचारोऽतिगर्हितः ॥")
दुराधर्षः, पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षतीति दूरीकरोतीति । धृष् + अच् ।) गौरसर्षपः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । २२ ।
"अतुलमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः ।"
इति तद्भाष्ये शङ्करः ॥ दुःखेन आ ईषदपि धर्षयितुमशक्यः इति । धृष् + "ईषद्दुःसुष्विति । ३ । ३ । १२६ । इति खल् ।) अधर्षणीये, त्रि ॥ (यथा, महाभारते । ६ । १९ । ३२ ।
"भीमसेनो गदां भीमां प्रकर्षन् परिघोपमाम् ।
प्रचकर्ष महासैन्यं दुराधर्षो महामनाः ॥")
दुराधर्षा, स्त्री, (दुराधर्ष + स्त्रियां टाप् ।) कुटुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥
दुरारुहः, पुं, (दुःखेन आरुह्यते इति । दुर् + आ + रुह + घञर्थे कर्म्मणि कः ।) बिल्वः । नारिकेलः । इति राजनिर्घण्टः ॥ (दुःखारोहणीये, त्रि । यथा, महाभारते । ३ । १४७ । ६१ ।
"क्व वा त्वयाद्य गन्तव्यं प्रब्रूहि पुरुषर्षभ ! ।
अतःपरमगम्योऽयं पर्व्वतः सुदुरारुहः ॥")
दुरारुहा, स्त्री, (दुरारुह + टाप् ।) खर्ज्जूरी । इति राजनिर्घण्टः ॥
दुरारोहः, पुं स्त्री, (दुःखेन आरुह्यते इति । रुह + कर्म्मणि खल् ।) शरटः । इति राजनिर्घण्टः ॥ दुःखारोहणीये, त्रि ॥ (यथा, महाभारते । ४ । ५ । १४ ।
"इयं कूटे मनुष्येन्द्र ! गहने महती शमी ।
भीमशाखा दुरारोहा श्मशानस्य समीपतः ॥")
दुरारोहा, स्त्री, (दुरारोह + टाप् ।) शाल्मलिवृक्षः । इति त्रिकाण्डशेषः ॥ श्रीवल्ली । इति राजनिर्घण्टः ॥
दुरालभा, स्त्री, (दुःखेन आलभ्यते स्पृश्यते असौ । दुर् + आ + लभ + खल् + टाप् । आगमविधेरनित्यत्वात् न नुम् ।) स्वनामख्यातकण्टकयुक्तक्षुद्रक्षुपविशेषः । स यवासप्रभेदः । हिञ्गुया इति ख्याता । तत्पर्य्यायः । दुरालम्भा २ धन्वयासः ३ ताम्रमूला ४ कच्छुरा ५ दुःस्पर्शा ६ धन्वी ७ धन्वयवासकः ८ प्रबोधनी ९ सूक्ष्मदला १० विरूपा ११ दुरभिग्रहा १२ दुर्लभा १३ दुष्प्रधर्षा १४ । इति राजनिर्घण्टः ॥ यासः १५ यवासः १६ दुःस्पर्शः १७ कुनाशकः १८ रोदनी १९ अनन्ता २० समुद्रान्ता २१ । इत्यमरः । २ । ४ । ९२ ॥ गान्धारी २२ काषाया २३ । इति भावप्रकाशः ॥ धनुर्यासः २४ युवसः २५ फच्छुरा २६ । इति शब्दरत्नावली ॥ विकण्टकः २७ । इति जटाधरः ॥ (पद्मसखी २८ । इति शब्दचन्द्रिका ॥) अस्या गुणाः । सारत्वम् । ज्वरच्छर्द्दिमेहभ्रमपित्तविसर्पवेदनाशित्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारत्वम् । अम्लत्वम् । मधुरत्वम् । वातगुल्मप्रमेहनाशित्वञ्च । इति राजनिर्घण्टः ॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ।"
इति भावप्रकाशः ॥
(गङ्गा । यथा, काशीखण्डे । २९ । ८८ ।
"दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा ॥")
दुरालभनीये, त्रि ॥
दुरालम्भा, स्त्री, (दुःखेन आलभ्यते इति । दुर् + आ + लभ + खल् + नुम् च ।) दुरालभा । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । ९८ । ३१ ।
"तीक्ष्णवीर्य्यास्तु भूतानां दुरालम्भाः सकण्टकाः ।
रक्तभूयिष्ठवर्णाश्च कृष्णाश्चैवोपहारयेत् ॥")
दुरालापः, पुं, (दुष्टः आलापः इति प्रादिसमासः ।) गालिः । इति शब्दार्थकल्पतरुः ॥
दुरासदः, त्रि, (दुःखेन आसद्यते इति । दुर् + आ + सद् + "ईषद्दुःसुष्विति ।" ३।३।१२६ । इति खल् ।) दुष्प्राप्यः । यथा,—
"दुरासदो दुर्विषहो भूतानां स बभूव ह ।"
इति श्रीभागवतम् ॥
(यथा च, देवीभागवते । १ । १० । ३२ ।
"धर्म्मस्य पुरतः प्राप्ते कामभावे दुरासदे ॥"
(दुष्प्रवेशः । यथा, माघे । १६ । १० ।
"घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैस्तव ।
नगरेषु भवन्तु वीथयः
परिकीर्णा वनवीरुधादिभिः ॥")
दुरितं, क्ली, (इण भावे + क्तः । दुष्टमितं गमनं नरकादिदुर्गतिप्राप्तिर्यस्मात् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, रघौ । ८ । २ ।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत् ॥")
तद्वति, त्रि ॥
दुरितदमनी, स्त्री, (दुरितं पापं दम्यते यया इति । दम + करणे ल्युट् । ङीप् च ।) शमी । इति राजनिर्घण्टः ॥ (दम + ल्युः ।) पापनाशिनी च ॥
दुरिष्टकृत्, पुं, (दुरिष्टम् अभिचारयज्ञं करोतीति । दुरिष्ट + कृ + क्विप् तुगागमश्च ।) अभिचारकर्त्ता । तस्य नरकं यथा,—
"देवद्विजपितॄन् द्वेष्टा रत्नदूषयिता च यः ।
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत् ॥"
इति विष्णुपुराणे । २ । ६ । १४ ॥
"दुरिष्टकृत् अभिचारकर्त्ता ।" इति तट्टीका ॥
दुरिष्ठः त्रि (दुर् + इष्ठन् ।) अतिमन्दः । अयमनयोरेषां वा अतिशयेन दुः निन्दितः । इति व्याकरणम् ॥
दुरीषणा, स्त्री, (दुर्दुष्टा ईषणा इच्छाभिशंसनम् । प्रादिसमासः ।) शापः । इति शब्दार्थकल्पतरुः ॥
दुरूहः, त्रि, (दुःखेन ऊह्यते इति । दुर् + ऊह + कर्म्मणि खल् ।) दुर्विज्ञेयः । यथा,—
"काव्यप्रकाशस्य दुरूहपङ्क्ती-
र्गदाधरो व्याकुरुते प्रयत्नात् ।"
इति गदाधरभट्टाचार्य्यकृतकाव्यप्रकाशटीका ॥
दुरोदरं, क्ली, (दुर्दुष्टमासमन्तादुदरं यस्य । दुष्टमुदरमस्य वा । पृषोदरादित्वात् साधुः ।) द्यूतभेदः । पाशकक्रीडा । इत्यमरः । ३।३।१७१ ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । २६ ।
"अर्थं किं तनुषे दुरोदरमिदं न स्वापतेयं तव ॥")
दुरोदरः, पुं, (दुष्टं आ समन्तात् उदरं यस्य ।) द्यूतकृत् । (यथा, महाभारते । २ । ५६ । ९ ।
"दुरोदरा विहिता ये तु तत्र
महात्मना धृतराष्ट्रेण राज्ञा ॥")
पणः । इति मेदिनी । रे, २६७ ॥
दुर्गं, क्ली, (दुःखेन गम्यतेऽत्र । दुर् + गम + "सुदुरोरधिकरणे ।" ३ । २ । ४८ । इत्यस्य वार्त्तिकोक्त्या डः ।) पर्व्वतादिभिर्दुर्गमं पुरम् । इत्यमरः । २ । ८ । १७ ॥ गड् इति कोल्ला इति च भाषा । तत्पर्य्यायः । कोट्टम् २ । यथा,—
"स्कन्धावारो राजधानी कोट्टदुर्गे पुनः समे ॥"
इति हेमचन्द्रः ॥
"अथ कोट्टो राजधानी राजधानकमित्यपि ।"
इति शब्दरत्नावली ।
"पुरं दुर्गमधिष्ठानं कोट्टोऽस्त्री राजधान्यपि ।"
इति जटाधरः ॥

तत्तु षड्विधम् । यथा,—
"तत्र दुर्गं नृपः कुर्य्यात् षण्णामेकतमं बुधः ।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च ॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ॥"
इति मात्स्ये १८१ अध्यायः ॥
राज्ञस्तत्करणावश्यकत्वं तच्छुभाशुभलक्षणञ्च यथा,—
"दुर्गोऽस्तु सततं कुर्य्यात् प्राकाराट्टालतोरणैः ।
दूषितामगराद्राजा दुर्गं दुर्गाश्रयं चरेत् ॥
दुर्गं बलं नृपाणान्तु नित्यं दुर्गं प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दश सहस्राणि तस्मात् दुर्गं प्रशस्यते ।
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ॥
अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् ।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् ।
मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम् ॥
यथा राक्षसराजस्य लङ्कादुर्गा जिता पुरा ॥
बलेः पुरी शोणिताख्यं तेजो दुर्गं प्रतिष्ठितम् ।
यतस्तत् यवनाकारमतो भ्रष्टश्रियो बलः ॥
सौभाग्यं शाल्वराजस्य नगरं पञ्चकोणकम्
दिवि यद्भ्रमते राजंस्तत्र भ्रष्टं भविष्यति ॥